শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীৱেঙ্কটেশ প্রপত্তিঃ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ
# ॥শ্রীৱেঙ্কটেশ প্রপত্তিঃ ॥

ঈশানাং জগতোস্য ৱেঙ্কটপতের্ৱিষ্ণোঃ পরাং প্রেযসীং
তদ্বক্ষস্স্থলনিত্যৱাসরসিকাং তত্ক্ষান্তিসংৱর্ধিনীম্।
পদ্মালঙ্কৃতপাণিপল্লৱযুগাং পদ্মাসনস্থাং শ্রিযং
ৱাতসল্যাদিগুণোজ্জ্বলাং ভগৱতীং ৱন্দে জগন্মাতরম্॥ ১ ॥

শ্রীমন্ কৃপাজলনিধে কৃতসর্ৱলোক
সর্ৱজ্ঞ শক্ত নতৱতসল সর্ৱশেষিন্।
স্বামিন্ সুশীল সুলভাশ্রিতপারিজাত
শ্রীৱেঙ্কটেশ চরণৌ শরণং প্রপদ্যে॥ ২ ॥

আনূপুরার্পিতসুজাতসুগন্ধিপুষ্প-
সৌরভ্যসৌরভকরৌ সমসন্নিৱেশৌ।
সৌম্যৌ সদানুভৱনেপি নৱানুভাৱ্যৌ
শ্রীৱেঙ্কটেশ চরণৌ শরণং প্রপদ্যে॥ ৩ ॥

সদ্যোৱিকাসিসমুদিত্বরসান্দ্ররাগ-
সৌরভ্যনির্ভরসরোরুহসাম্যৱার্তাম্।
সম্যক্ষু সাহসপদেষু ৱিলেখযন্তৌ
শ্রীৱেঙ্কটেশ চরণৌ শরণং প্রপদ্যে॥ ৪ ॥

রেখামযধ্ৱজসুধাকলশাতপত্র-
ৱজ্রাঙ্কুশাম্বুরুহকল্পকশঙ্খচক্রৈঃ।
ভৱ্যৈরলঙ্কৃততলৌ পরতত্ত্বচিহ্নৈঃ
শ্রীৱেঙ্কটেশ চরণৌ শরণং প্রপদ্যে॥ ৫ ॥

তাম্রোদরদ্যুতিপরাজিতপদ্মরাগৌ
বাহ্যৈর্মহোভিরভিভূতমহেন্দ্রনীলৌ।
উদ্যন্নখাংশুভিরুদস্তশশাঙ্কভাসৌ
শ্রীৱেঙ্কটেশ চরণৌ শরণং প্রপদ্যে॥ ৬ ॥

www.prapatti.com

সপ্ৰেমভীতি কমলাকরপল্লৱাভ্যাং
সংৱাহনেপি সপদি ক্লমমাদধানৌ।
কান্তাৱৱাঙ্মনসগোচরসৌকুমাৰ্যৌ
শ্ৰীৱেঙ্কটেশ চরণৌ শরণং প্ৰপদ্যে॥ ৭ ॥

লক্ষ্মীমহীতদনুৰূপনিজানুভাৱ-
নীলাদি দিৱ্যমহিষী করপল্লৱানাম্।
আৰুণ্যসংক্ৰমণতঃ কিল সান্দ্ৰরাগৌ
শ্ৰীৱেঙ্কটেশ চরণৌ শরণং প্ৰপদ্যে॥ ৮ ॥

নিত্যানমদ্বিধিশিৱাদিকিরীটকোটি-
প্ৰত্যুপ্তদীপ্তনৱরত্নমহঃপ্ৰৰোহৈঃ।
নীরাজনাৱিধিমুদারমুপাদধানৌ
শ্ৰীৱেঙ্কটেশ চরণৌ শরণং প্ৰপদ্যে॥ ৯ ॥

ৱিষ্ণোঃ পদে পরম ইত্যুদিতপ্ৰশংসৌ
যৌ মধৱ উতস ইতি ভোগ্যতযাপ্যুপাত্তৌ।
ভূযস্তথেতি তৱ পাণিতলপ্ৰদিষ্টৌ
শ্ৰীৱেঙ্কটেশ চরণৌ শরণং প্ৰপদ্যে॥ ১০ ॥

পাৰ্থায তৎসদৃশসারথিনা ত্বযৈৱ
যৌ দৰ্শিতৌ স্বচরণৌ শরণং ৱ্ৰজেতি।
ভূযোপি মহ্যমিহ তৌ করদৰ্শিতৌ তে
শ্ৰীৱেঙ্কটেশ চরণৌ শরণং প্ৰপদ্যে॥ ১১ ॥

মন্মূৰ্ধ্নি কালিযফণে ৱিকটাটৱীষু
শ্ৰীৱেঙ্কটাদ্ৰিশিখরে শিরসি শ্ৰুতীনাম্।
চিত্তেপ্যনন্যমনসাং সমমাহিতৌ তে
শ্ৰীৱেঙ্কটেশ চরণৌ শরণং প্ৰপদ্যে॥ ১২ ॥

অম্লানহৃষ্যদৱনীতলকীৰ্ণপুষ্পৌ
শ্ৰীৱেঙ্কটাদ্ৰিশিখরাভরণাযমানৌ।
আনন্দিতাখিলমনোনযনৌ তৱৈতৌ
শ্ৰীৱেঙ্কটেশ চরণৌ শরণং প্ৰপদ্যে॥ ১৩ ॥

প্রাযঃ প্রপন্ন জনতা প্রথমাৱগাহ্যৌ
    মাতুস্সন্তনাৱিৱ শিশোরমৃতাযমানৌ।
প্রাপ্তৌ পরস্পরতুলামতুলান্তরৌ তে
    শ্রীৱেঙ্কটেশ চরণৌ শরণং প্রপদ্যে॥ ১৪ ॥

সত্ত্বোত্তরৈসসততসেৱ্যপদাম্বুজেন
    সংসার তারক দযার্দ্র দৃগঞ্চলেন।
সৌম্যোপযন্তৃমুনিনা মম দর্শিতৌ তে
    শ্রীৱেঙ্কটেশ চরণৌ শরণং প্রপদ্যে॥ ১৫ ॥

শ্রীশ শ্রিযা ঘটিকযা ত্বদুপাযভাৱে
    প্রাপ্যে ত্বযি স্বযমুপেযতযা স্ফুরন্ত্যা।
নিত্যাশ্রিতায নিরৱদ্যগুণায তুভ্যং
    স্যাং কিঙ্করো ৱৃষগিরীশ ন জাতু মহ্যম্॥ ১৬ ॥

॥ ইতি শ্রীৱেঙ্কটেশ প্রপত্তিঃ সমাপ্তা ॥

www.prapatti.com